# A-II/1/22ABDS2CCTC1/23

## द्वितीयसत्रार्द्धः

## प्रथमपत्रम् (DSCC-20)

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'सौत्रान्तिकदर्शनम्' इत्यस्य रचनाकारः कः?
2. पुरुषपुद्गलानि कति? पाठ्यग्रन्थदिशा सूचयत।
3. प्रथमबौद्धसंगीतिः कुत्र आयोजिता? कश्चास्या आयोजकः?
4. आर्यसत्यानि कति? नामानि लिखत।
5. कति पिटकानि? नामानि लिखत।
6. प्रथमधर्मचक्रप्रवर्तनं कुत्र जातम्?
7. द्वितीयबौद्धसंगीतेः आयोजनं कुत्र अभूत्? कश्चास्था अध्यक्षः?
8. अट्ठकथाकारः कः?
9. बौद्धनिकायाः कति? पाठ्यग्रन्थदिशा सूचयत।
10. प्रतीत्यसमुत्पादस्य अपरनाम किम्?
11. क्षणभङ्गवादिनाः के? कश्चास्य पदस्य अर्थः?
12. सुत्तपिटके कति निकायानि? कानि च तानि?
13. तृतीयबौद्धसंगीतिः कुत्र आयोजिता? कश्चास्या आयोजकः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. प्रतीत्यसमुत्पादस्य अंगान् विलिख्य विवेचयत।
15. पालित्रिपिटकस्य परिचयो देयः।

16. चतुर्थबौद्धसंगीतिः कुत्र आयोजिता? अस्याः माहात्म्यं लेखनीयम्।

17. अष्टादशबौद्धनिकायानि कानि? पाठ्यग्रन्थदिशा विवेचयत।

18. शब्दार्थसम्बन्धविमर्शः पाठ्यग्रन्थदिशा विवेचनीयः।

19. सौत्रान्तिकनिकायस्य परिचयो देयः।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. 'सौत्रान्तिक दर्शनम्' इति ग्रन्थस्य वैशिष्ट्यमभिलक्ष्य निबन्धमेकं लिखत।

21. सौत्रान्तिकदर्शनकारस्य व्यक्तित्वं कृतित्वञ्च लिखत।

22. बौद्धसंगीतीनां महत्त्वमभिलक्ष्य निबन्धमेकं विशदीकुरुत।

# A-II/2/22ABDS2CCTC2/23

## द्वितीयसत्रार्द्धः

## द्वितीयपत्रम् (DSCC-21)

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'अभिधर्मकोशम्' इत्यत्र अभिधर्मपदस्य कोऽर्थः?
2. अभिधमकोशे कति कोशस्थानानि सन्ति? द्वितीय कोशस्थानस्य किं नाम?
3. इन्द्रियाणि कति? कानि च तानि? पाठ्यग्रन्थदिशा लिखत।
4. को नाम विपाकः? पाठ्यग्रन्थदिशा लिखत।
5. अभिधर्मकोशकारः कः?
6. के सास्रवाः धर्माः? पाठ्यग्रन्थदिशा सूचयत।
7. आयतनानि कति? नामानि लिखत।
8. अभिधर्मकोशग्रन्थोऽयं कस्य बौद्धप्रस्थानस्य समर्थकः?
9. संज्ञा का? कतिविधाश्च संज्ञाः?
10. चित्तस्य पर्यायान् लिखत।
11. कति स्कन्धानि? कानि च तानि?
12. कति कुशलेन्द्रियाणि? पाठ्यग्रन्थदिशा लिखत।
13. चत्वारि बौद्धदर्शनप्रस्थानानि कानि?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्वस्मृत्या पाठ्यग्रन्थस्य श्लोकमेकं विलिख्य व्याख्या विधेया।

15. सप्रसङ्गं व्याख्येयम् –

विपाको जीवितं द्वेधा द्वादशान्त्याष्टकाद् ऋते।

दौर्मनस्याच्च तत्त्वेकं सविपाकं दश द्विधा॥

16. ससन्दर्भव्याख्या विधेया –

चतुर्ष्वर्थेषु पञ्चानामाधिपत्यं द्वयोः किल।

चतुर्णां पञ्चकाष्टानां संक्लेशव्यवदानयोः॥

17. यथाग्रन्थं विवेचयत –

क्लिष्टे त्रैधातुके लाभः षण्णां षण्णां द्वयोः शुभे।

त्रयाणां रूपजे शैक्षे चतुर्णां तस्य शेषिते॥

18. प्रसंगपूर्वकं व्याख्यायताम् –

वेदना चेतना संज्ञा छन्दः स्पर्शो मतिः स्मृतिः।

मनस्कारोऽधिमोक्षश्च समाधिः सर्वचेतसि॥

19. यथाग्रन्थं विवेचयत –

चित्तचैत्तास्तथान्येऽपि सम्प्रयुक्तकवर्जिता।

चत्वारः प्रत्यया उक्ता हेत्वाख्याः पञ्च हेतवः॥

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. अभिधर्मकोशकारस्य व्यक्तित्वं कृतित्वश्च वर्णयत।

21. अभिधर्मकोशस्य द्वितीयकोशस्थानस्य सारमभिलक्ष्य निबन्धमेकं लिखत।

22. अभिधर्मपिटकस्य परिचयो देयः।

# A-II/3/22ABDS2CCTC3/23

## द्वितीयसत्रार्द्धः

## तृतीयपत्रम् (DSCC-22)

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. 'मिलिन्दपञ्ह' शब्दस्य कोऽर्थः?
2. मिलिन्देन सह नागसेनस्य प्रथमसमागमः कुत्र अभवत्?
3. नागसेनः कः? पाठ्यग्रन्थानुसारं सूचयत।
4. मिलिन्दपञ्हग्रन्थस्य भाषा का?
5. मिलिन्दः कस्य नगरस्य राज्ञः आसीत्?
6. मिलिन्दपञ्हग्रन्थे कति अध्यायाःसन्ति? प्रथमोऽध्यायस्य नाम किम्?
7. आयतनानि कति? नामोल्लेखं कुरुत।
8. को न पटिसंदहति? पाठ्यग्रन्थदिशा लिखत।
9. प्रज्ञा का? पाठ्यग्रन्थदिशा सूचयत।
10. को परिसन्दहति? पाठ्यग्रन्थदिशा लिखत।
11. को नाम निरोधो? पाठ्यग्रन्थदिशा सूचयत।
12. किं नाम मनोविज्ञानम्? पाठ्यग्रन्थदिशा लिखत।
13. पूरणकस्सपेन सह मिलिन्दस्य समागमो कुत्र अभूत?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. पाठ्यग्रन्थस्य मङ्गलाचरणं विलख्य सम्यग् व्याख्या विधेया।
15. नागसेनस्य वैदुष्यं कीदृशमृ? विवृणुत।

16. मिलिन्दनागसेनयोः पुब्बजातिकथासारो लेखनीयः।

17. मिलिन्दनागसेनयोः प्रथमसमागमो विवेचनीयः।

18. सागलनगरस्य वैभववर्णनं यथाग्रन्थं विवेचनीयम्।

19. अनुपिटकवाङ्मयस्य परिचयं देयम्।

## खण्डः – ग

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. मिलिन्दपञ्हग्रन्थस्य वैशिष्ट्यमधिकृत्य निबन्धमेकं लेखनीयम्।

21. अधीतग्रन्थस्य द्वितीयप्रकरणस्य सारमधिकृत्य निबन्धमेकं विशदीकुरुत।

22. पाठ्यग्रन्थस्य प्रथमप्रकरणस्य सारमधिकृत्य निबन्धमेकं लिखत।

# A-II/4/22ABDS2CCTC4/23

## द्वितीयसत्रार्द्धः

## चतुर्थपत्रम् (DSCC-23)

## बौद्धदर्शनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन दश प्रश्ना एव समाधेयाः।** **10 (प्रश्नः) × 02 (अङ्कः) = 20**

1. विज्ञप्तिमात्रतासिद्धिग्रन्थकर्ता कः? कस्य सम्प्रदायस्य अयं ग्रन्थः?
2. धर्मोपचारः कः? पाठ्यग्रन्थदिशा सूचयत।
3. विज्ञानस्य अपरपर्यायाः के?
4. विज्ञानपरिणामः कतिविधः? नामानि लिखत।
5. योगाचारदर्शनस्य प्रवर्तकाचार्यः कः?
6. आलयविज्ञानस्य चैतसिकाः कति? नामानि लिखत।
7. वेदना कतिविधा? नामानि लिखत।
8. नैरात्म्यं कतिविधम्? नामानि लिखत।
9. आयतनानि कति? नामानि लिखत।
10. सौगतदर्शनसम्प्रदायाः कति? नामानि लिखत।
11. पाठ्यग्रन्थस्य त्रिंशिका प्रकरणे कति कारिकाः सन्ति? कारिकामेकां लिखत।
12. त्रिंशिका विज्ञप्तिः प्रकरणस्य प्रतिपाद्यो विषयः कः?कथम्?
13. 'विज्ञप्तिमात्रतासिद्धिः' इत्यत्र विज्ञप्तिपदस्य कोऽर्थः?

### खण्डः – ख

**केचन चत्वारः प्रश्ना एव समाधेयाः।** **04 (प्रश्नः) × 05 (अङ्कः) = 20**

14. स्वस्मृत्या पाठ्यग्रन्थस्य कारिकामेकां विलिख्य सम्यग् व्याख्या विधेया।

15. सप्रसङ्गं व्याख्येयम् –

विपाको मननाख्यश्च विज्ञप्तिर्विषयस्य च।

तत्रालयाख्यं विज्ञानं विपाकः सर्वबीजकम्॥

16. यथाग्रन्थं विवेचयत –

धर्माणां परमार्थश्च स यतस्तथतापि सः।

सर्वकालं तथाभावात् सैव विज्ञप्तिमात्रता॥

17. ससन्दर्भव्याख्या विधेया –

तस्यव्यावृत्तिरर्हत्वे तदाश्रित्य प्रवर्तते।

तदालम्बं मनोनाम विज्ञानं मननात्मकम्॥

18. प्रसङ्गपूर्वकं व्याख्यायताम् –

येन येन विकल्पेन यद्यद् वस्तु विकल्प्यते।

परिकल्पित एवासौ स्वभावो न स विद्यते॥

19. यथाग्रन्थं विवेचयत –

स एवानास्रवो धातुरचिन्त्यः कुशलो ध्रुवः।

सुखो विमुक्तिकायोऽसौ धर्माख्योऽय महामुनेः॥

**खण्डः – ग**

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

20. पाठ्यग्रन्थस्य त्रिंशिकायाः प्रतिपाद्याविषयकः कः? विवृणुत।

21. आचार्यवसुबन्धोः व्यक्तित्वंकृतित्वञ्चाभिलक्ष्य निबन्धमेकं लिखत।

22. विज्ञानवादस्य बौद्धदर्शनप्रस्थाने अवदानमधिकृत्य निबन्धमेकं लिखत।